# वैदिक गुरु परम्परा पूजन पद्धतिः

अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

आवाहनम्

नारायणं पद्मभवं वशिष्ठं शक्तिं च तत्पुत्र पराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ।
श्री शङ्कराचार्यमथास्य पद्म-पादं च हस्तामलकं च शिष्यम् ।
तं त्रोटकं वार्तिककारमन्यान् अस्मद् गुरून्सन्ततमानतोऽस्मि ।।

श्रुति-स्मृति-पुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ।।
शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ।।

यद् द्वारे निखिला निलिम्पपरिषद् सिद्धिं विधत्तेऽनिशम्
श्रीमच्छ्रीलसितं जगद्गुरुपदं नत्वात्मतृप्तिङ्गताः ।
लोकाज्ञानपयोदपाटनधुरं श्री शङ्करं शर्मदं
ब्रह्मानन्द सरस्वतीं गुरुवरम् ध्यायामि ज्योतिर्मयम् ।।

| | |
|---|---|
| आवाहनम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| आसनम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| स्नानम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| वस्त्रम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| चन्दनम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| अक्षतान् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| पुष्पम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| धूपम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| दीपम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| आचमनीयम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| नैवेद्यम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| आचमनीयम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| ताम्बूलम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |
| श्रीफलम् | समर्पयामि श्री गुरुचरणकमलेभ्यो नमः । |

For Purusha Sanskrit study only.  Please do not duplicate.

## आरार्तिक्यम्

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि ।।

आरार्तिक्यम् समर्पयामि श्री गुरुचरणकमलेभ्यो नमः ।
आचमनीयम् समर्पयामि श्री गुरुचरणकमलेभ्यो नमः ।

## पुष्पांजलिम्

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परंब्रह्म तस्मै श्रीगुरवे नमः ।।
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ।।

श्री ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम् ।
विश्वातीतं गगनसदृशं तत्वमस्यादिलक्ष्यम् ।।
एकं नित्यं विमलमचलं सर्वधी साक्षिभूतम् ।
भावातीतं त्रिगुणसहितं सद्गुरुं तं नमामि ।।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ।।

पुष्पांजलिम् समर्पयामि श्री गुरुचरणकमलेभ्यो नमः ।।

For Purusha Sanskrit study only. Please do not duplicate.